# Kumara or Kartikeya Sahasranama Stotram

# કુમારસહસ્રનામસ્તોત્રમ્ અથવા કાર્તિકેયસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : kumArasahasranAmastotram kArtikeyasahasranAmastotram

File name : kumArasahasranAmastotram.itx

Category : subrahmanya, sahasranAma

Location : doc_subrahmanya

Transliterated by : Sivakumar Thyagararajan

Proofread by : Sivakumar Thyagararajan, Preeti N Bhandare

Description/comments : See corresponding nAmAvaliH

Latest update : July 17, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 17, 2021

*sanskritdocuments.org*

# કુમારસહસ્રનામસ્તોત્રમ્ અથવા કાર્તિકેયસહસ્રનામસ્તોત્રમ્

ૐ શ્રીગણેશાય નમઃ ।

ભૈરવઃ -
ધનં દારાન્સુતાન્ક્ષેત્રં ધાન્યં પશુધનં તથા ।
પ્રાપ્નોતિ પુરુષો નિત્યં સ્મરણાદ્યસ્ય સ્વામિનઃ ॥

તસ્ય વક્ષ્યે કુમારસ્ય દિવ્યં નામસહસ્રકમ્ ।
સર્વતઃ પાપહં ધર્મ્યં જપ્યમેતન્મુમુક્ષુભિઃ ॥

વિનિયોગઃ -
અસ્ય શ્રીસ્વામિકાર્તિકેયનામસહસ્રસ્ય, બ્રહ્મા ઋષિઃ,
ગાયત્રી છન્દઃ, ષડાનનો દેવતા, હાં બીજં, કુમારાયેતિશક્તિઃ,
નમ ઇતિ કીલકં, આત્મનો વાઙ્મનઃકાયોપાર્જિતપાપનિવારણાર્થં
ચતુર્વર્ગસિદ્ધ્યર્થે પાઠે વિનિયોગઃ ॥

કાં કીં કૂં કૈં કૌં કઃ ઇતિ ન્યાસઃ
ધ્યાનં -
દેવં ષણ્મુખભૂષિતં સુચતુરં તં દ્વાદશાક્ષં જટો-
    ત્તંસં શક્તિધરં સુશુક્લમમલં સદ્વૈજયન્ત્યાશ્રિતમ્ ।
ઘણ્ટાપાણિમુમાઙ્ગુ શીલિનમડજાનન્દં શિખીન્દ્રાલયં
    ધ્યાયેઽભીષ્ટવરપ્રદં હૃદિ સદા રક્તાઙ્ગરાગસ્રજમ્ ॥

ૐ કાર્તિકેયાય વિદ્મહે । સેનાધિપતયે ધીમહિ ।
તન્નઃ કુમારઃ પ્રચોદયાત્ ॥   repeat 3 times

અથ સહસ્રનામસ્તોત્રમ્ ।
ૐ ભૈરવ ઉવાચ -
ૐ કુમારઃ કવચી કન્દઃ કર્મઠઃ કલિકાલજિત્ ।
કન્દર્પરૂપઃ કામેશઃ કાલપુત્રઃ કલાધરઃ ॥ ૧॥

કલઙ્કરહિતઃ કાલકલનઃ કલિકાલિકઃ ।
કલાકલિતકઃ કામી કામનાશઃ કરાસ્પદઃ ॥ ૨॥

કઠોરચિત્તઃ કલશી કલઃ કલકલાકરઃ ।
કરીરનીલઃ કિઞ્જલ્કકલિતઃ કોકિલાલપઃ ॥ ૩॥

કરિવક્ત્રાગ્રગઃ કીલાજટઃ કલિલનાશનઃ ।
કોલપૂજ્યઃ કીલમોક્ષઃ કપિલઃ કપિલાનનઃ ॥ ૪॥

કલકલઃ કલાલાપઃ કન્દર્પી કપટાપહઃ ।
કઃ કં કેનઃ કપેન્દ્રાસ્યઃ કપિઃ કપિલરૂપધૃત્ ॥ ૫॥

કીનાશનાશઃ કઙ્કાલધારી કક્કોલભક્ષકઃ ।
કપોલી કમલાકાન્તઃ કમલઃ કીશવર્ધનઃ ॥ ૬॥

કીરવાક્કૂરહાક્તૂરઃ કૂર્મપૃષ્ઠઃક્રમોડક્રમઃ ।
ક્રૌઞ્ચારિઃ ક્રકચોદીર્ણઃ કૃત્તિવાસઃ કૃતી કૃતમ્ ॥ ૭॥

કરાલઃ કુલસમ્પૂજ્યઃ કૂલહા કુલચેતનઃ ।
ક્રવ્યાદ્ગણપરીવારઃ ક્રવ્યાદઃ કદલીમૃદુઃ ॥ ૮॥

કલાપિયાનઃ કૃકરઃ કારુઃ કારી કરઃ કુરઃ ।
કલ્લોલદોઃકટીનગ્નઃ કોટિદઃ કોટિતત્પરઃ ॥ ૯॥

કટકી કટવઃ કોટ્ટસ્થાનઃ કરભવર્તનઃ ।
કાલરૂપઃ કમ્બગલઃ કરિગઃ કલગઃ કરી ॥ ૧૦॥

કર્મીરઃ કલ્મષઃ કણ્ઠી કૃતઙ્ગઃ કૃત્તિભાસ્વરઃ ।
કુવેરબન્ધુઃ કાશીપઃ કૃશમધ્યઃ કૃશાનુદૃક્ ॥ ૧૧॥

કુણ્ડલ્યલઙ્કૃતઃ કેશચણઃ કચમણિઃ કચઃ ।
કશ્મીરનિલયઃ કમ્પશ્ચરાચરગુરુશ્ચરઃ ॥ ૧૨॥

ચલાચલશ્ચલજિહ્વશ્ચમ્પાપતિશ્ચમૂપતિઃ ।
ચષાલનિલયશ્ચણ્ડીપ્રિયપુત્રશ્ચયશ્ચુપઃ ॥ ૧૩॥

ચમૂરચર્મવાસી ચ ચમકશ્ચમરીગતિઃ ।
ચપલાદ્યુતિભૃચ્ચણ્ડશ્ચણ્ડાલક્ષપણશ્ચહઃ ॥ ૧૪॥

ચકોરનેત્રશ્ચેલાસશ્ચમસી ચીનવસ્ત્રભૃત્ ।
ચાર્વાઙ્ગશ્ચીરવાંશ્ચન્દ્રકલાકલિતશેખરઃ ॥ ૧૫॥

ચન્દ્રશીતશ્ચન્દ્રદ્યોતી ચન્દ્રકાવૃતદેહભૃત્ ।
ચન્દનાલેપનશ્ચન્દ્રશ્ચન્દ્રશેખરલાલિતઃ ॥ ૧૬॥

ચાણૂરમર્દનશ્ચક્રધારી ચક્રવરાનતઃ ।
ચક્રમધ્યગતશ્ચક્રી ચાક્રિકશ્ચણ્ડવિગ્રહઃ ॥ ૧૭॥

ચમ્પકાલઙ્કૃતશ્ચાર ચારુનેત્ર ચલાડલકઃ ।
ચલદ્ભૂશ્ચીભનશ્ચારુશ્ચૌરહા ચોલપૂજિતઃ ॥ ૧૮॥

ચરિત્રચઞ્ચુચણ્ડીશશાસ્તા ચામરચર્ચિતઃ ।
ચલનીલગતિશ્ચોષ્યાસ્વદુગ્ધશ્ચુમ્બકશ્ચલઃ ॥ ૧૯॥

ચલાક્ષશ્ચપલોન્માથી ચમ્પેયધવલશ્ચકઃ ।
ચમ્પૂસ્તવ્યશ્ચારકશ્ચચરકજ્ઞાનિષેવિતઃ ॥ ૨૦॥

ચાણિક્યકુશલશ્ચિત્રશ્ચિત્રકર્માચ ચર્મભૃત્ ।
અલુમ્પકશ્ચ ચણ્ડાંશુશ્ચામીકરનિભાનનઃ ॥ ૨૧॥

ચટત્કારકૃતારાવશ્ચણ્ડીવન્દ્યશ્ચલાલિકઃ ।
ચતુર્થીપ્રિયપૂર્વશ્ચ ચતુર્થીપ્રિયપાલનઃ ॥ ૨૨॥

ચતુરશ્ચતુરાઙ્ગાઢ્યશ્ચતુષ્પથકૃતાલયઃ ।
ચતુરવ્રતપૂજ્યશ્ચ ચતૂરશ્ચરણાર્ચિતઃ ॥ ૨૩॥

ચઞ્ચરીકકૃતાલાપશ્ચિરધ્યેયશ્ચિરાતૃપઃ ।
ચઞ્ચુરશ્ચોદ્યકર્તા ચ ચોદકશ્ચોદનાપ્રિયઃ ॥ ૨૪॥

ચુલકાચમકશ્ચિત્રચિત્રકાઙ્કિતગોધિકઃ ।
ચિત્રાઙ્ગદશ્ચિત્રભૂષશ્ચિત્તાભસ્માનુલેપનઃ ॥ ૨૫॥

ચિન્તાનાશકરશ્ચિત્તસુખદશ્ચિત્તપદ્મભૂઃ ।
ચતુરાત્માચતુર્બાહુશ્ચતુર્વ્યૂહશ્ચતુર્મુખઃ ॥ ૨૬॥

ચતુરથકરશ્ચાર્વીગમ્યશ્ચ ચતુરક્ષરઃ ।
અનાદિરગદોઽનન્તોઽજરોઽક્ષરવિચારકઃ ॥ ૨૭॥

અપ્રમેયોઽન્તરઙ્ગોઽણુરનૂનોઽનવરોઽનઘઃ ।
અઘહાઽનઘચિન્ત્યશ્ચ અઘાસુરનિસૂદનઃ ॥ ૨૮॥

અઘસ્થિરોઽગસ્ત્યનતોઽબલાબલદદોઽવનઃ ।

અમોઘવિક્રમોઽગમ્યોઽનુત્તાનોઽનુત્તરોઽપરઃ ॥ ૨૯॥

અપારોઽકૃત્રિમાચારોઽપારાવારગભીરધીઃ ।
અતર્ક્યોઽનર્ઘ્યમાહાત્મ્યોઽનેકાધારોઽલયોઽરિધૃત્ ॥ ૩૦॥

અત્રસ્નુરગજાભર્તાઽગેશયોઽઙ્ગાર્ધવાશિતઃ ।
અસઙ્ગોઽવિભ્રમોઽભઙ્ગોઽન્ધઘ્નોઽબ્જાધૃતશેખરઃ ॥ ૩૧॥

અલઙ્ઘ્યોઽતીન્દ્રિયોઽતીન્દ્રોઽગોજાવઞ્ચનપેશલઃ ।
અસ્તભ્યમૂર્તિરન્તજ્ઞોઽનન્તાર્ચિતપદદ્વયઃ ॥ ૩૨॥

અચેત્યશ્ચાક્ષરોઽકોપોઽકુસૃતિરમલામ્બરઃ ।
અઙ્ગાર્પિતપ્રદાકુશ્ચ અચલાટનતત્પરઃ ॥ ૩૩॥

અમોઘવિક્રમોમર્ત્યસ્તુતોઽમૃતપદોઽપદઃ ।
અમરાર્પિતસદ્ભોગોઽભવોઽમ્બુજકૃતાસનઃ ॥ ૩૪॥

અમ્બુજાર્ચિતપાદાબ્જોઽરજોઽફલ્ગુમનોરથઃ ।
અહીનબાહુરઽગ્રાહ્યો હીનાહિતવિભૂષણઃ ॥ ૩૫॥

અહીનભોગદોઽભોગોંઽસપીઠધૃતભૂતિકઃ ।
અગ્રાઙ્ગનોઽઙ્ગદોનઙ્ગપ્રીતિકૃદઽગજાર્ચિતઃ ॥ ૩૬॥

અગ્રગણ્યો મહામાત્યોઽમદોઽદમવિભેદકઃ ।
અઘોષઘોષ્યોઽઘોરશ્ચ અમલામલખવિગ્રહઃ ॥ ૩૭॥

અગ્રદર્શ્યગ્રમાતાચાનલસોઽલસકોપનઃ ।
અનેકકોટિદોઽકોટિરરક્તોઽલક્ષ્યરૂપકઃ ॥ ૩૮॥

અમૃતાંશોઽમૃતાંશુશ્ચાપ્યમૃતેશ્વર એવચ ।
અમૃતાંશપ્રસન્નશ્ચ અમરેશોઽમરારિહા ॥ ૩૯॥

અકલ્યકલહોઽકલ્યોઽમૂર્ત્તાનન્દવિગ્રહઃ ।
આલોક આપ્લવોઽપ્યાલ આનન્દેશ્વર એવચ ॥ ૪૦॥

આમ્નાયોઽથાગમજ્ઞેય આચારનિધિરેવચ ।
આજ્ઞાધરોઽથાજ્યભોગ ઇનશ્ચેભમુખસ્તથા ॥ ૪૧॥

ઇન્દ્રેન્દુકલાધારી ઇન્દ્રજાલપટુસ્તથા ।
ઈડ્યઈશાન ઈરીચ તાલાઙ્કુસ્તાલ વિગ્રહઃ ॥ ૪૨॥

તલાતલગતોમાલી માલ્યવાન્કુદી તથા ।
કલઙ્કુહા કપાલી ચ કાલિકારમણસ્તથા ॥ ૪૩॥

કરાલરૂપઃ કાલાગ્નિઃ શિખાવાઞ્છિખિવાહનઃ ।
શિરીષકોમલાઙ્ગશ્ચ કરીરાભઃ કરીરભૃત્ ॥ ૪૪॥

કનકાઙ્ગદદોર્દણ્ડઃ કનકાશો જયીતથા ।
જાલન્ધરરિપુસ્તારસ્તારકાન્તક એવચ ॥ ૪૫॥

તારકસ્તારવાદી ચ તારસ્તારકરાજજિત્ ।
તરિસ્તરુણરૂપીચ તરુશાયી જટાન્તકઃ ॥ ૪૬॥

તાત્પર્યજ્ઞસ્તલોન્માથી તારાપતિરથોતલઃ ।
તલિનં ચ તડાગશ્ચ તતરૂપશ્ચ તારદૃક્ ॥ ૪૭॥

તુલાહીનોથ તાલજ્ઞસ્તુહિનાંશુસ્તુતાલિકઃ ।
સ્તોત્રં સ્તુન્દિલરૂપશ્ચ તુહિનાચલસંશ્રયઃ ॥ ૪૮॥

તોતુલાપ્રિયકારીચ તાલુસ્તૌતિલરૂપકઃ ।
તુલાપુરુષસંવાદસ્તર્કગમ્યસ્તલોજ્ઝિતઃ ॥ ૪૯॥

તાલજ્ઞાનરતસ્તાપહન્તા તરણિરેવચ ।
તપોવનરતસ્તુણ્ડિસ્તુતસ્તાપન એવચ ॥ ૫૦॥

તમાલવન ચારીચ તિલકસ્તતવિશ્વકઃ ।
તમીભર્તા તમોહન્તા તામસસ્તુમલપ્રિયઃ ॥ ૫૧॥

ત્વઙ્ગનસ્તઙ્ગનસ્તઞ્ચ તમોરિસ્ત્વચિસારકઃ ।
તામ્રાક્ષસ્ત્ર્યમ્બકસ્ત્ર્યક્ષસ્તીક્ષ્ણજ્યોતિસ્ત્રિબન્ધુહૃત્ ॥ ૫૨॥

ત્રિપુરારિસ્ત્રિમૂર્તીશસ્તતીયપદસંશ્રયઃ ।
ત્રિબન્ધુસ્ત્રિપુરાધીશસ્તૃતીયનયનોજ્જ્વલઃ ॥ ૫૩॥

ત્રિપદાસારગેયશ્ચત્રિપુટીશરણં તથા ।
પવનઃ પાલકઃ પાલીપાણિઃ પાલ્યગ્રણીઃ પટુઃ ॥ ૫૪॥

પાતાલાલયહા પાનસક્તઃ પઙ્કજલોચનઃ ।
પલાયનપરઃ પીઠસંસ્થિતાપીઠપૂજિતઃ ॥ ૫૫॥

પુરોહિતઃ પુરોગ્રામી પુરારાતિઃ પૂરેશ્વરઃ ।
પ્રવીણઃ પુણ્યદૃક્પૂતતનુઃ પર્વતસંશ્રયઃ ॥ ૫૬॥

પરીક્ષકઃ પુરાણજ્ઞઃ પ્રમાણમ્પ્રત્યયઃ પ્રમા ।
પ્રમાતા પરમન્ધામ પરમ્બ્રહ્મ પરાશ્રયઃ ॥ ૫૭॥

પરાપરગતિઃ પારઃ પુરાણપુરુષઃ પરમ્ ।
પ્રકૃતિપ્રભવઃ પાતા પ્રલયઃ પદ્મવિષ્ટરઃ ॥ ૫૮॥

પદ્માક્ષઃ પદ્મભૂઃ પાર્થવરદઃ પાર્થિવઃ પણઃ ।
પરાપતિઃપરેશાનઃ પુરુષશ્ચપિતામહઃ ॥ ૫૯॥

પીનવક્ષાઃપીતવપુઃ પત્રિગઃ પથિકઃ પતઃ ।
પુરોળાશરતઃ પાન્થઃ પરેતા વૃતએવચ ॥ ૬૦॥

પાશીપાલશહસ્તશ્ચ પદ્માઙ્કઃ પરમેશ્વરઃ ।
પુરાણગમ્યઃપૂતશ્ચ પુષ્પપૂજ્યઃ પુરેશયઃ ॥ ૬૧॥

પ્રદ્યુમ્નઃપુષ્પબાણશ્ચ પૂજ્યઃ પુષ્પશિખીમયઃ ।
પરમેષ્ટી પ્રકૃતીષ્ટઃ પરાપરકૃતાસ્પદઃ ॥ ૬૨॥

પૂર્વઃ પૌલસ્ત્યવરદઃ પૌલોમીકુચમર્દનઃ ।
પ્રજાપાલઃ પ્રજાલોપી પૂતનાન્તક એવચ ॥ ૬૩॥

પૂતનામા પાન્થતોષી પર્યઙ્કશયનઃ પટઃ ।
પરમાયુઃ પશુપતિઃ પલ્લીવાસી પરાયણઃ ॥ ૬૪॥

પ્રમોદી પત્તનં પર્વ પવિત્રં પાત્રમેવચ ।
પાલનઃ સર્વભૂતાનાં પૂર્ણઃ પૂરયિતા પતિઃ ॥ ૬૫॥

પુણ્યકીર્તિશ્ચ પાપઘ્નઃ પવિહસ્તશ્ચ પક્ષિરાટ્ ।
પતઙ્ગધામા પૂર્ણાંશઃ પતગેશઃ પ્રશાન્તધીઃ ॥ ૬૬॥

યાજ્યો યજનપૂજ્યશ્ચ યષ્ટાયક્ષપ્રિયો યમઃ ।
યમાપ્યો યયુરૂપશ્ચ યાયી યાનરતો યયી ॥ ૬૭॥

યાનપાનગતિર્યાગી યમલોકૈકશાસનઃ ।
યશસ્વી યાપનો યામો યોગેન્દ્રો યાજ્ઞિકપ્રિયઃ ॥ ૬૮॥

યન્તા યશોધરો યજ્વા યક્ષેશો યામલાગમઃ ।
યોદ્ધા યુગૈકનિલયો યુગલં યુગનામભૃત્ ॥ ૬૯॥

યોજનાપ્યો યાગગમ્યો યજ્ઞભુગ્યજતાં વરઃ ।

યાયજૂકો યજ્ઞભોપા યુગવર્તો યમાત્મકઃ ॥ ૭૦॥

યજ્ઞઘ્નો યમભીતિઘ્નો યમારિર્યક્ષપાલકઃ ।
યૂપો લક્ષ્મીધરો લાસ્યો લલિતો લલિતાગમઃ ॥ ૭૧॥

લમ્બોદરાર્ચ્યો લજ્જાવાલ્લાભદો લલિતાનનઃ ।
લઙ્કેશાર્ચિતપત્પદ્મો લલનાલલિતો લલઃ ॥ ૭૨॥

લક્ષ્યો લલિતદેહશ્ચ લાક્ષારુણપદદ્વયઃ ।
લયેશો લઙ્ઘિતારાતિર્લિઙ્ગરૂપી લતાશ્રયઃ ॥ ૭૩॥

લમ્બનો લઘુચેષ્ટશ્ચ રતીશાભો રતિપ્રિયઃ ।
રમણો રાક્ષસેન્દ્રઘ્નો રક્ષોધિપસુપૂજિતઃ ॥ ૭૪॥

રાકાપતિવપૂ રાજા રમાપતિવરપ્રદઃ ।
રાજરાજાર્ચિતો રાત્રિધવાઙ્કિતકલેવરઃ ॥ ૭૫॥

રામપૂજ્યો રામસ્પર્ધો રેવતીજાનિપૂજિતઃ ।
રેવારતો રાજ્યપ્રદો રાવણારાતિપૂજિતઃ ॥ ૭૬॥

રસાતલગતો રામો રમણીરામકોપિચ ।
રાત્રિનાથાનનો રઙ્ગનર્તકો રણકત્થનઃ ॥ ૭૭॥

રાલાર્ચ્યો રક્તનેત્રશ્ચ રસજ્ઞો રસવલ્લભઃ ।
રમાપ્રિયો રાવણાર્ચ્યો રામેશો રામવલ્લભઃ ॥ ૭૮॥

રોહિણીશો રમાભર્તા રસનો રભસપ્રિયઃ ।
રણાર્જિતયશો રક્તનેત્રો રલ્લકવાસનઃ ॥ ૭૯॥

રતીશદેહદાહી ચ રતિજ્ઞો રસભાવવિત્ ।
રોહિતાશ્વો રત્નમૌલિરિઙ્ગનોપોભસદ્ગતિઃ ॥ ૮૦॥

ઇનનેત્ર ઇલાપુત્ર ઈશાનઃ સર્વકર્મણામ્ ।
ઈડ્ય ઈશ્વરપુત્રશ્ચ ઈપ્સિતાર્થફલપ્રદઃ ॥ ૮૧॥

ઈતિભઙ્ગશ્ચખલહા ખલપૂઃ ખલપાવનઃ ।
ખસત્તાકઃ ખસૂતિશ્ચ ખગતિઃ ખચરેશ્વરઃ ॥ ૮૨॥

ખમૂર્ધા ખમણિઃ ખડ્ગહસ્તઃ ખચરલોચનઃ ।
ખગયાનો ગણેશાનો ગજાસુરનિસૂદનઃ ॥ ૮૩॥

ગમાગમવિહીનશ્ચ ગમાગમવિશેષકઃ ।
ગમા ગમાતિગજ્ઞેયો ગાઙ્ગેયો ગણસૂર્ગણઃ ॥ ૮૪॥

ગમ્ભીરનિનદોગેયપ્રિયો ગુરુવિશેષિતઃ ।
ગરીયાન્ગહનઙ્ગણ્ડમાલી ગુણગણાર્ચિતઃ ॥ ૮૫॥

ગુણ્યો ગણકપૂજ્યશ્ચ ગગનામલસત્ત્વધૃત્ ।
ગઞ્જાલયો ગઞ્જપતિર્ગુહાવાસી ગિરિપ્રિયઃ ॥ ૮૬॥

ગતિઃસંન્યાસતત્ત્વાનાં ગમ્યો ગતપરાત્મનામ્ ।
ગયાદિતીર્થસઙ્ઘાનાં પાવનો ગતિમાન્ગતિઃ ॥ ૮૭॥

ઘસ્મરો ઘુસૃણલેપી ઘૃણી ઘૃતભુજાર્ચિતઃ ।
ઘૃણિમાન્ઘર્ષણોઽઘાનાં ઘનાઘનરવો ઘનઃ ॥ ૮૮॥

ઘનવાદ્યરતઃચ્છન્દઃ છવિમાંચ્છિદુરોહસામ્ ।
છન્દસાં ચ્છન્દરૂપશ્ચ જરાતીતો જપપ્રિયઃ ॥ ૮૯॥

જપાકુસુમસઙ્કાશોજનપાલો જલેશ્વરઃ ।
જાલન્ધરધરો જાલી જાલન્ધરનિષૂદનઃ ॥ ૯૦॥

જાજ્વલ્યમાનતેજાશ્ચ જગતીશો જનાતિગઃ ।
જમ્ભારાતિપ્રિયો જમ્ભૂપ્રસૂનાભરણો જટી ॥ ૯૧॥

જાબાલવેશપ્રચ્છન્નોજજશાલી જટાપહઃ ।
જાઢ્યહાજઙ્ગલાવાસી જન્મસાફલ્યદો નૃણામ્ ॥ ૯૨॥

જવનો જીવનં જીવપ્રાણદો જયતાંવરઃ ।
જલ્પાકોજનજન્માદિર્જલદાશ્રય એવચ ॥ ૯૩॥

જલદો જર્જરીવાદ્યરતોઝઙ્કાર એવચ ।
ઝરપ્રવાહ્યોઢક્કાઢ્યો ફણત્કારપ્રિયસ્તથા ॥ ૯૪॥

બન્ધુરો બન્ધુરાઙ્ગશ્ચ બન્ધમોચનતત્પરઃ ।
બાલખિલ્યાગ્રણીર્બન્ધુપ્રિયો વધરસંશ્રયી ॥ ૯૫॥

બલિપ્રિયો બલારાતિરતિદોબહુદો બહુઃ ।
બાહુભૂષ્યો બલિઘ્નશ્ચ બલાસુરનિષૂદનઃ ॥ ૯૬॥

બલદો બલિનાંશ્રેષ્ઠો બલિષ્ઠો બલિદાયકઃ ।
બાહુલો બલિદર્પઘ્નો બહુલાબલહોબલી ॥ ૯૭॥

બકાસુરપ્રમાથીચ બકપત્રી બલોજ્જ્વલઃ ।
ભાસુરો ભાસ્કરો ભાલતલાઙ્કિતકલોજ્જ્વલઃ ॥ ૯૮॥

ભામાપ્રિયો ભસ્મરૂક્ષો ભમાલી ભગમાલ્યપિ ।
ભગી ભગવદીડ્યશ્ચ ભુવનેશો ભગૌચ્ચયકૃત્ ॥ ૯૯॥

ભોગી ભોગિવિભૂષશ્ચ ભૂશાયી ભારહાપિચ ।
ભૂતપ્રભુશ્ચભૂતીશો ભગનેત્રહરો ભપઃ ॥ ૧૦૦॥

ભાનુર્ભાભૂમિશાયો ચ ભૂતિદાયી ભુવોગતિઃ ।
ભોગાસ્પદં ભૂપવન્દ્યોભોગિકઙ્કણ એવચ ॥ ૧૦૧॥

ભૌમાસુરપ્રમાથીચ ભૌમપીડાનિવારણઃ ।
ભૌમદેવો ભૂમિદેવભક્તિપૂજિતપત્કજઃ ॥ ૧૦૨॥

ભૂમિદ્વારં મતિર્મન્તા મરણત્રાસકારકઃ ।
મહિષાસુરઘાતી ચ મહિષાસનભીતિદઃ ॥ ૧૦૩॥

મનનાપ્યો મનોધ્યેયોમતિમાન્મનનપ્રિયઃ ।
મનોરથપથાતીતો મનોરથગતિપ્રદઃ ॥ ૧૦૪॥

મનોભિરામો માન્યશ્ચ મહેશ્વાસો મહાકૃપઃ ।
મહીભરણદક્ષશ્ચ મહાભીતિપ્રભઞ્જનઃ ॥ ૧૦૫॥

મુનિર્મનનશીલશ્ચ। મુનીનાન્ત્રાણકારણમ્ ।
મરુજ્જ્યેષ્ઠો મરુત્ત્વાંશ્ચમરુપાતામૃતાપહઃ ॥ ૧૦૬॥

મઠાશ્રયો મણિસ્થાનો મઞ્જીરધ્વનિસઙ્ગતઃ ।
મહાશયો મહાશશ્ચ મહાદેહો મહાતપાઃ ॥ ૧૦૭॥

મહાચરિતચઞ્ચુશ્ચ મહાશ્ચર્યનિધિર્મહઃ ।
મહનીયપદદ્વન્દ્વો મહાનીતિર્મહાગુણઃ ॥ ૧૦૮॥

મહાધૃતિર્મહાશાન્તો મહીભરણતત્પરઃ ।
મયૂરપૃષ્ઠગો મન્ત્રિગ્રામણોર્મન્ત્રપારગઃ ॥ ૧૦૯॥

મહાસીનો મહાચિત્તો મહાનન્દો મહોદયઃ ।
વાજિકૃતારિયૂગશ્ચ વાજપેયૈકસાધકઃ ॥ ૧૧૦॥

વાનપ્રસ્થાર્ચ્યપત્પીઠો વરણીયોમલાત્મનામ્ ।

વૃન્દારકોત્તમો વન્યવૃત્તિર્વનનવઞ્ચકઃ ॥ ૧૧૧॥

વન્દારુગમ્યો વૃન્દશ્રીર્વનમાલી વિશામ્પતિઃ ।
વનેચરાગ્રણીર્વન્દ્યચરણો વનપાલકઃ ॥ ૧૧૨॥

વસુર્વસુપ્રદો વસ્તુસાધકો વાસ્તુપૂજિતઃ ।
વાસિન્તીવાસિતોવલ્ગત્પાણિર્વચનસૌખ્યદઃ ॥ ૧૧૩॥

વલ્લીવ્રતતિગુમ્રાત્મા વામનો વામલોચનઃ ।
વિશુદ્ધાત્મા વિરૂપશ્ચવિસ્તારો વિગ્રહીવિષઃ ॥ ૧૧૪॥

વિકૃતો વિશ્વરૂપશ્ચ વિખ્યાતો વિશ્વદૃગ્વહઃ ।
વિમોચિતામરો વાલી વાલિબન્ધકએવચ ॥ ૧૧૫॥

વ્યાસો વ્યસનસક્તશ્ચ વિરજા વીરણીસ્તથા ।
વિબુધાગ્ર્યચરો વિશ્વો વીરો વર્ધનએવચ ॥ ૧૧૬॥

વિરામોખિલભૂતાનાં વર્ધનશ્ચાપદાંવટઃ ।
વૃષારૂઢો વિવસ્વાંશ્ચ વૃષશાસ્તાવૃષધ્વજઃ ॥ ૧૧૭॥

વિશ્વક્ષેત્રો વિશાલાક્ષો વિમન્યુર્વિશદાશયઃ ।
વિભીષણો વિશેષજ્ઞો વિજ્ઞાની ચ વિમર્શકઃ ॥ ૧૧૮॥

વિકલ્પકલ્પિતો  વીણાવાદનૈકરતો વણિક્ ।
વાણિનીવનનો વર્ચો વિત્તો વાર્ધકિરૂપધૃત્ ॥ ૧૧૯॥

વાડવાસ્યો વરૂથી ચ વસુધાતલભૂષણમ્ ।
વસુન્ધરાધરો વર્મભૃતાંવરનિનાદિતઃ ॥ ૧૨૦॥

વક્તા ચ વનિતાઢ્યશ્ચ વ્રતવાન્વ્રતસંયુતઃ ।
વેદગર્ભો વાદિરૂપો વાસનાક્ષયદો વશી ॥ ૧૨૧॥

શરણં શરધચ્છર્મ શશિભૂષિતશેખરઃ ।
શરીરધૃતભૂમિશ્ચ શરભઃ શશિશીતલઃ ॥ ૧૨૨॥

શીતલામલદેહશ્રીઃ શીતાંશુનયનોજ્જ્વલઃ ।
શ્રીપર્ણઃ શર્મદઃ શમ્ભુઃ શ્રીસ્તુતઃ શલભઃ શલઃ ॥ ૧૨૩॥

શશિવિન્દુઃ શમીગર્ભઃશબ્દબ્રહ્મ શચીપતિઃ ।
શિવશ્ચ શરભૂઃ શાર્ઙ્ગધન્વા શાન્તમનાઃ શમઃ ॥ ૧૨૪॥

શિખિયાનઃ શિખીશૈલગર્ભવાસી શિવાત્મજઃ ।
શલ્યહારી શૂલપાણિઃ શૂલભૂઃ શૂલરોગહૃત્ ॥ ૧૨૫॥

શલ્યસ્તુતઃ શરાસઙ્ગધુતારિશિવલઃ શમી ।
શશઃ શઙ્કરકીર્તિશ્ચ શાન્તાત્મા શમ્બલાપહઃ ॥ ૧૨૬॥

શમ્બલાગ્રામવાસી ચ શંવાહઃ શમભૂઃ શિશુઃ ।
શ્મશાનનિલયઃ શ્વેતચ્છવિઃ શક્તિમયઃ શિવઃ ॥ ૧૨૭॥

શનિપીડાપહઃ શઙ્કુકીલી શવરસંસ્તુતઃ ।
ષાણ્માતુરશ્ચ ષઢ્વક્ત્રઃસહનસહજઃ સુહૃત્ ॥ ૧૨૮॥

સહસ્રદઃ સહસ્રાક્ષઃ સદ્ભૂતિઃ સદ્ગતિઃ સદઃ ।
સેનાભર્તો સભારત્નં સર્વભૂતાવસાનભૂઃ ॥ ૧૨૯॥

સર્વઃ સર્ગશ્ચ સન્માત્રં સિદ્ધસેવિતપદ્યુગઃ ।
સિદ્ધિદઃ સાધકઃ સિદ્ધઃ સુરાસુરનમસ્કૃતઃ ॥ ૧૩૦॥

સુરાસુરબલત્રાતા સુરાસુરબલાપહઃ ।
સપ્તસ્વરાર્ચ્યકીર્તિશ્ચ સપ્તલોકૈકસંશ્રયઃ ॥ ૧૩૧॥

સપ્તસપ્તિસુતેજાશ્ચ સુકલઃસકલાતિહૃત્ ।
સર્વાવાસઃ સર્વબીજં સિન્ધુશાયી સ્વદઃ સ્વભૂઃ ॥ ૧૩૨॥

સદોદ્યોગી સુલીલશ્ચ સદ્ભૂતિઃ સર્ગભાવનઃ ।
સ્વભાવઃ સર્વગઃ સન્ધિઃ સદસત્પતિરેવચ ॥ ૧૩૩॥

સામોદઃ સુભગઃ સત્યઃ સર્વાધારી સભૂતપઃ ।
સદેવાસુરસઙ્ગીતઃ સહસ્રાંશુકિરીટધૃત્ ॥ ૧૩૪॥

સજ્જઃસઙ્કુલિતાલોકઃ સર્વભૂતસમાશ્રયઃ ।
સદ્ભોગનિલયઃ સિન્ધુઃ સઙ્ગીતાગમવિશ્રુતઃ ॥ ૧૩૫॥

સાહિત્યામૃતતૃપ્તશ્ચ સૌહિત્યાશી સુરેશ્વરઃ ।
સત્ત્વવન્દ્યઃ સત્વધામા સર્વમઙ્ગલસંશ્રયઃ ॥ ૧૩૬॥

સુધીઃ સત્સુલભઃ સઙ્ગવિકલઃ સુવિશારદઃ ।
હરાત્મજો હતાશઙ્કો હર્યશ્વો હલિપૂજિતઃ ॥ ૧૩૭॥

હનૂમત્સંસ્તુતો હાલાપાનસક્તો હરીશ્વરઃ ।
હિરણ્યકવચો હન્તાડપદાં હાભો હતાસ્વરઃ ।

હેતિહસ્તો હયો હાલો હયગો હારભૂષિતઃ ॥ ૧૩૮॥

ફલશ્રુતિઃ -
ઇત્યેવં કાર્તિકેયસ્ય સર્વાગમરહસ્યકમ્ ।
નામ્નામષ્ટાભિરધિકં સહસ્રં સત્ફલપ્રદમ્ ॥ ૧૩૯॥

અવાપ્નુવન્તિ તત્સર્વમ્પાઠેનાસ્ય મનીષિણઃ ।
ભૂતપ્રેતપિષાચાદ્યા દૂરાદેવક્ષયન્તિ હિ ॥ ૧૪૦॥

નતાદૃગ્જાયતેનર્થં લોકે કિઞ્ચન ભૂતજમ્ ।
યોદૃશી વિઘ્નશાન્ત્યર્થં શક્તિરસ્ય મતા સતામ્ ॥ ૧૪૧॥

તસ્માન્નિઃ સંશયોભૂત્વા ધર્મકામાર્થસિદ્ધયે ।
સ્વામિનઃ કાર્તિકેયસ્ય પઠેન્નામ્નાં સહસ્રકમ્ ॥ ૧૪૨॥

ઇતિ સ્વામિકાર્તિકેયસહસ્રનામાભિધં ચતુર્થાઙ્ગં સમાપ્તમ્ ॥

Encoded by Sivakumar Thyagararajan
Proofread by Sivakumar Thyagararajan, Preeti N Bhandare

*Kumara or Kartikeya Sahasranama Stotram*
pdf was typeset on July 17, 2021

Please send corrections to *sanskrit@cheerful.com*